पातयति -यितुं); 'to inflict punishment,' दण्डं प्रणी, दण्डं कृ.

INFLICTED, *p. p.* प्रणीतः -ता -तं, सम्प्रणीतः -ता -तं, प्रवर्त्तितः -ता -तं, प्रयुक्तः -क्ता -क्तं, आचरितः -ता -तं, विहितः -ता -तं, कृतः -ता -तं.

INFLICTER, *s.* (Of punishment) दण्डप्रणेता *m.* (तृ), दण्डप्रवर्त्तकः, दण्डभृत् *m.*

INFLICTION, *s.* प्रणयनं, प्रवर्त्तनं, प्रयोगः, आचरणं, विधानं, करणं; 'of punishment,' दण्डप्रणयनं, दण्डयोगः, दण्डप्रयोगः, दण्डप्रवर्त्तनं, दण्डाधानं, दण्डोपधानं, दण्डपातनं, दण्डकरणं.

INFLUENCE, *s.* प्रभावः, अधिकारः, गौरवं, वशं, शक्तिः *f.*, बलं, भारः, प्रभवः, प्रभुता, कर्त्तृत्वं, क्षमता, प्रतापः, सामर्थ्यं, गुणः, कार्य्यकारित्वं, गुणकारिता, व्यापकता, व्याप्तिः *f.*; 'the influence of love,' कामाधिकारः; 'under the influence of love,' कामवशः -शा -शं, कामाधिष्ठितः -ता -तं, कामोपहतः -ता -तं; 'through the influence of love,' कामवशात्; 'through the influence of alarm,' साध्वसवशात्; 'planetary influence,' ग्रहावेशः.

To INFLUENCE, *v. a.* अधिकृ, प्रभू, अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), उपहन् (c. 2. -हन्ति -न्तुं), वशीकृ.—(Induce, move to action) प्रवृत् (c. 10. -वर्त्तयति -यितुं), प्रेर् (c. 10. -ईरयति -यितुं), नियुज् (c. 10. -योजयति -यितुं), प्रयुज्, अनुनी (c. 1. -नयति -नेतुं), आकृष् (c. 1. -कर्षति -क्रष्टुं), प्रोत्सह् (c. 10. -साहयति -यितुं).

INFLUENCED, *p. p.* अधिष्ठितः -ता -तं, अधिकृतः -ता -तं, उपहतः -ता -तं, प्रेरितः -ता -तं, प्रवर्त्तितः -ता -तं, नियुक्तः -क्ता -क्तं, नियोजितः -ता -तं, आकृष्टः -ष्टा -ष्टं, प्रोत्साहितः -ता -तं, वशः -शा -शं in comp.; 'influenced by love,' कामाधिष्ठितः -ता -तं, कामोपहतः -ता -तं, कामवशः -शा -शं; 'influenced by avarice,' लोभाकृष्टः -ष्टा -ष्टं.

INFLUENTIAL, *a.* गुरुः -ष्वी -रु, सगौरवः -वा -वं, गुरुप्रभावः -वा -वं, सप्रभावः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, भारी -रिणी -रि (न्), प्रबलः -ला -लं, शक्तिमान् -मती -मत् (त्), अधिकारी -रिणी -रि (न्), प्रतापी -पिनी -पि (न्).

INFLUENTIALLY, *adv.* प्रभावेण, सप्रभावं, गौरवेण, सगौरवं, सभारं.

INFLUENZA, *s.* साधारणपीनसरोगः, साधारणश्लेष्मरोगः, सन्निपातकः.

INFLUX, *s.* आगमः -मनं, प्रवाहः, अन्तःप्रवाहः, अन्तर्वहनं, प्रसवणं, अन्तःसवणं, अन्तर्गमनं.

To INFOLD, *v. a.* वेष्ट् (c. 1. वेष्टते -ष्टितुं), आवेष्ट्, परिवेष्ट्, संवेष्ट्, आछद् (c. 10. -छादयति -यितुं), परिछद्, पिधा (c. 3. -दधाति -धातुं), कोशेन परिवेष्ट्, कोशस्थं -स्थां -स्थं कृ, वासनस्थं -स्थां -स्थं कृ.—(Clasp with the arms, embrace) भुजाभ्यां पीड् (c. 10. पीडयति -यितुं), आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), समालिङ्ग्, आश्लिष् (c. 4. -श्लिष्यति -श्लेष्टुं).

INFOLDED, *p. p.* आवेष्टितः -ता -तं, वेष्टितः -ता -तं, परिवेष्टितः -ता -तं, आछन्नः-न्ना -न्नं,कोशस्थः-स्था-स्थं, वासनस्थः-स्था-स्थं, अवगुण्ठितः-ता-तं.

To INFOLIATE, *v. a.* सपत्रीकृ, सपर्णीकृ, सदलीकृ, पत्रान्वितं -तां -तं कृ.

To INFORM, *v. a.* (Make known, tell) ज्ञा in caus. (ज्ञापयति, ज्ञपयति -यितुं), विज्ञा, निविद् (c. 10. -वेदयति -यितुं), आविद्, समाविद्, विद्, बुध् (c. 10. बोधयति -यितुं), प्रबुध्, प्रतिबुध्, अवबुध्, सूच् (c. 10. सूचयति -यितुं), संसूच्, आख्या (c. 2. -ख्याति -तुं or caus. -ख्यापयति -यितुं), समाख्या, ख्या, कथ् (c. 10. कथयति -यितुं), अवगम् (c. 10. -गमयति -यितुं), शंस् (c. 1. शंसति -सितुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), सन्दिश्, आदिश्, श्रु (c. 10. श्रावयति -यितुं), कर्णगोचरीकृ.—(Inform against) अपराधं सूच्, प्राड्विवाकसाक्षाद् आह्वे (c. 1. -ह्वयति -ह्वातुं), उपनिधा (c. 3. -दधाति -धातुं), पैशुन्यं कृ, पिशुनो भू.

INFORMAL, *a.* विधिविरुद्धः -द्धा -द्धं, अविधिः -धिः -धि, विधिघ्नः -घ्नी -घ्नं, अवैधिकः -की -कं, नियमविरुद्धः -द्धा -द्धं, रीतिविरुद्धः &c., अव्यवस्थितः -ता -तं, उत्सूत्रः -त्रा -त्रं, अमर्य्यादः -दा -दं, अयोग्यः -ग्या -ग्यं, अयथार्थः -र्था -र्थं

INFORMALITY, *s.* अविधिः *m.*, विधिविरोधः, विधिव्यतिक्रमः, अव्यवस्था, उत्क्रमः, अविधानं, अनियमः, अरीतिः *f.*, विधिभङ्गः नियमभङ्गः, अमर्य्यादा, विसूत्रता.

INFORMALLY, *adv.* अविधिवत्, अविधितस्, अविधानतस्, विधिविरुद्धं, अयथाविधि, नियमविरोधेन, अक्रमेण, अविधिपूर्व्वं.

INFORMANT, *s.* ज्ञापकः, विज्ञापकः, आवेदकः, निवेदकः, बोधकः, प्रबोधकः, सूचकः, सूची *m.* (न्), ख्यापकः, आख्यायकः.

INFORMATION, *s.* विज्ञप्तिः, विज्ञापनं, ज्ञप्तिः, ज्ञापनं, ज्ञाप्तिः *f.*, विज्ञाप्तिः *f.*, निवेदनं, आवेदनं, विदितं, बोधः -धनं, प्रबोधः -धनं, सूचनं, संसूचनं, आख्यानं, ख्यापनं, प्रत्यादेशः.—(Intelligence, news) वार्त्ता, समाचारः, वृत्तान्तः, सन्देशः, सन्दिष्टं, संवादः, सूचना.—(Knowledge) ज्ञानं, विज्ञानं, बोधः, अवगमः.—(In law, intelligence of crime) अपराधसूचनं -ना, अन्यायसूचनं -ना, स्वयमुक्तिः *f.*, पैशुन्यं, उपनिधानं.

INFORMED, *p. p.* विज्ञप्तः -प्ता -प्तं, विज्ञापितः -ता -तं, ज्ञापितः -ता -तं, ज्ञप्तः -प्ता -प्तं, ज्ञपितः -ता -तं, अनुज्ञापितः -ता -तं, आवेदितः -ता -तं, निवेदितः -ता -तं, बोधितः -ता -तं, प्रबोधितः -ता -तं, सूचितः -ता -तं, संसूचितः -ता -तं, आख्यातः -ता -तं, समाख्यातः -ता -तं, प्रत्यादिष्टः -ष्टा -ष्टं, सन्दिष्टः -ष्टा -ष्टं, गृहीतार्थः -र्था -र्थं.

INFORMER, *s.* सूचकः, सूची *m.* (न्), पिशुनः, कर्णेजपः, कर्णेजपः, बोधकः, उपनिधाता *m.* (तृ), अपराधसूचकः, अन्यायसूचकः.—(Conveyer of intelligence) वार्त्तिकः, वार्त्तायनः.

INFORMITY, *s.* निराकारत्वं, अनाकारत्वं, अरूपता, विरूपता, वैरूप्यं, निरवयवत्वं.

INFRACTION, *s.* भङ्गः, भञ्जनं, खण्डनं, भेदः, अतिक्रमः, व्यतिक्रमः -मणं, लङ्घनं, उल्लङ्घनं; 'of an agreement,' संविद्व्यतिक्रमः; 'of a law,' व्यवस्थालङ्घनं.

INFRANGIBLE, *a.* अभेद्यः -द्या -द्यं, अभेदनीयः -या -यं, अखण्डनीयः -या -यं, अखण्ड्यः -ण्ड्या -ण्ड्यं, अनतिक्रमणीयः -या -यं, अलङ्घनीयः -या -यं.

INFREQUENCY, *s.* विरलता, वैरल्यं, अबहुत्वं, अनभीक्ष्णता, अनाभीक्ष्ण्यं, अनित्यता, कादाचित्कत्वं, क्वाचित्कत्वं, अपौनःपुन्यं, असामान्यं.

INFREQUENT, *a.* विरलः -ला -लं, विरलागतः -ता -तं, अनभीक्ष्णः -क्ष्णा -क्ष्णं, अबहुशो वर्त्तमानः -ना -नं, अनित्यः -त्या -त्यं, अनैत्यिकः -की -कं, कादाचित्कः -त्का -त्कं, क्वाचित्कः -त्का -त्कं, अपौनःपुनिकः -की -कं, असततः -ता -तं, असामान्यः -न्या -न्यं.

INFREQUENTLY, *adv.* अबहुशस्, अनभीक्ष्णं, अनित्यं, विरलं, कदाचित्.

To INFRINGE, *v. a.* (Break) भञ्ज् (c. 7. भनक्ति, भंक्तुं), खण्ड् (c. 10. खण्डयति -यितुं), भिद् (c. 7. भिनत्ति, भेत्तुं), भङ्गं कृ.—(Violate) अतिक्रम् (c. 1. -क्रामति -क्रमितुं), व्यतिक्रम्, लङ्घ् (c. 10. लङ्घयति -यितुं), उल्लङ्घ्, विलङ्घ्, लुप् (c. 10. लोपयति -यितुं), विलुप्, अतिचर् (c. 1. -चरति -रितुं), अतिवृत् (c. 1. -वर्त्तते -र्त्तितुं).

INFRINGED, *p. p.* भग्नः -ग्ना -ग्नं, लङ्घितः -ता -तं, उल्लङ्घितः -ता -तं, अतिक्रान्तः -न्ता -न्तं, लुप्तः -प्ता -प्तं, खण्डितः -ता -तं, विच्छिन्नः -न्ना -न्नं.

INFRINGER, *s.* भङ्गकरः, भञ्जकः, भङ्गकारी *m.* (न्), लङ्घनकारी, अतिक्रमी *m* (न्), विच्छेदकः, लोपकरः, अतिवर्त्ती *m.* (न्).

INFRINGEMENT, *s.* भङ्गः, भञ्जनं, भेदः, खण्डनं, अतिक्रमः -मणं, व्यतिक्रमः -मणं, लङ्घनं, उल्लङ्घनं, लोपः -पनं, विच्छेदः, अतिवर्त्तनं; 'of a compact,' संविद्व्यतिक्रमः, नियमातिक्रमः, नियमभङ्गः; 'of a law,' व्यवस्थालङ्घनं, व्यवस्थालोपः.

INFURIATE, *a.* कोपाकुलः -ला -लं, क्रोधाकुलः -ला -लं, रोषवेगाकुलः -ला -लं, संरब्धः -ब्धा -ब्धं, क्रोधान्धः -न्धा -न्धं, उन्मादसंरब्धः -ब्धा -ब्धं, मदोत्कटः